# Sarayu Sudha

# सरयूसुधा

## Document Information

Text title : Sarayu Sudha

File name : sarayUsudhA.itx

Category : devii, aShTaka, nadI

Location : doc_devii

Author : Durgaprasad DvivedI

Transliterated by : Kamini Viswanathan

Proofread by : Kamini Viswanathan, Lalitha Mallikarjunan

Latest update : February 6, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 6, 2021

*sanskritdocuments.org*

# सरयूसुधा

तेऽन्तः सत्त्वमुदञ्चयन्ति रचयन्त्यानन्दसान्द्रोदयं
दौर्भाग्यं दलयन्ति निश्चलपदः सम्भुञ्जते सम्पदः ।
शय्योत्थायमदभ्रभक्तिभरितश्रद्धाविशुद्धाशया
मातः! पातकपातकर्त्रि ! सरयु! त्वां ये भजन्त्यादरात् ॥ १॥

किं नागेशशिरोवतंसितशशिज्योत्स्नाछटा सञ्चिता
किं वा व्याधिशमाय भूमिवलयं पीयूषधाराऽऽगता ।
उत्फुल्लामलपुण्डरीकपटलीसौन्दर्य सर्वंकषा
मातस्तावकवारिपूरसरणिः स्नानाय मे जायताम् ॥ २॥

अश्रान्तं तव सन्निधौ निवसतः कूलेषु विश्राम्यतः
पानीयं पिबतः क्रियां कलयतस्तत्त्वं परं ध्यायतः ।
उद्यत्प्रेमतरङ्गम्भगुरदृशा वीचिच्छटां पश्यतो
दीनत्राणपरे! ममेदमयतां वासिष्ठि! शिष्टं वयः ॥ ३॥

गङ्गा तिष्यविचालिता रविसुता कृष्णप्रभावाश्रिता
क्षुद्रा गोमतिका परास्तु सरितः प्रायोयमाशां गताः ।
त्वं त्वाकल्पनिवेशभासुरकला पूर्णेन्दुबिम्बोज्ज्वला
सौम्यां संस्थितिमातनोषि जगतां सौभाग्यसम्पत्तये ॥ ४॥

मज्जन्नाकनितम्बिनी-स्तनतटाभोगस्खलत्कुङ्कुम-
क्षोदामोदपरम्परापरिमिलत्कल्लोलमालावृते ।
मातर्ब्रह्मकमण्डलूदकलसत्सन्मानसोल्लासिनि !
त्वद्वारां निचयेन मामकमलस्तोमोऽयमुन्मूल्यताम् ॥ ५॥

इष्टान् भोगान् घटयितुमिवागाधलक्ष्मी पराध्या
वातारब्धस्फुरितलहरीहस्तमावर्तयन्ती ।
गन्धद्रव्यच्छुरणविकसद्वारिवासो वसाना
सा नः शीघ्रं हरतु सरयूः सर्वपापप्ररोहान् ॥ ६॥

जयति विपुलपात्रप्रान्तसंरूढगुल्म-
व्रततिततितिनिबद्धारामशोभां श्रयन्ती ।
निशि शशिकरयोगात्सैकतेऽप्यम्बुसत्तां
सपदि विरचयन्ति साऽपगावैजयन्ती ॥। ७॥

अंहांसि नाशयन्ती घटयन्ती सकलसौख्यजालानि ।
श्रेयांसि प्रथयन्ती सरयूः साकेतसङ्गता पातु ॥ ८॥

य इमकं सरयूस्तबकं पठेन्निविडभक्तिरसाप्लुतमानसः ।
स खलु तत्कृपया सुखमेधतेऽनुगतपुत्रकलत्रसमृद्धिभाक् ॥। ९॥

॥ इति सरयू-सुधा समाप्ता ॥

Encoded by Kamini Vishwanathan

Proofread by Kamini Vishwanathan, Lalitha Mallikarjunan

*Sarayu Sudha*

pdf was typeset on February 6, 2021

Please send corrections to *sanskrit@cheerful.com*